(आयुर्वेदीय द्रव्याभिधान) मुक्तावली
(or पर्याय मुक्तावली.)
— Compiled and Edited by
श्री गोपीमोहन कविराज — Published
by श्री भुवनचन्द्र बसाक at संवाद
ज्ञान रत्नाकर प्रेस. Calcutta,
1931 Vikram era.

(14)

1252

Bill No. 3/07-08
153-
2008-0318

Indira Gandhi National Centre for the Arts

ed to warn the state that non-com-
with conditionalities "cannot go
er".
the officials here deny, they have
any formal intimation, but at the

not passed in the state assembly. As for the
project loan, only 10 million-dollar drip ir-
rigation project is going on.
The ADB postponed the second ...

... SSM Quadri and Justice
SN Variava said here on
Wednesday that the Section
197 of the Criminal Proce-

trate issued summons to the
police officer.
The officer moved the Pat-
na High Court complaining
that prior sanction from his

ruling, Justice V
for the purpose o
tion the offence
have been comm
public servant
something to do

आयुर्व्वेदीय द्रव्याभिधाने

# मुक्तावली।

श्रीगोपीमोहनकविराजेन

संगृहीता संशोधिता च।

कलिकातायां

श्रीयुक्तभुवनचन्द्रवसाकमहोदयेन

संवादज्ञानरत्नाकराख्ययन्त्रे मुद्रिता।

सम्वत् १८३१।

(निमतला घाट ष्ट्रीट ८ नं. भवन।)

SANS
615.536
A4U

# विज्ञापनम् ।

DATA ENTERED
Date 26/07/08

अधुना नानायुर्व्वेदग्रन्थस्य बहुलप्रचारतया सर्व्वेषामेव विद्योत्साहिनां तदध्ययने महान् यत्नोदृश्यते, तस्मात्तद्ग्रन्थस्य भेषज द्रव्यज्ञानसौकर्य्यार्थं द्रव्याभिधानस्य सर्व्वथैव प्रयोजनत्वे प्रयत्नतत्परेण मया मुक्तावलीनामधेयं द्रव्याभिधानं संगृहीतं यथाशक्ति शोधितञ्च, तथापि सर्व्वप्रकारेण विशुद्धमिति वक्तुं न शक्यते, भ्रमप्रमादवशात् यद्यदशुद्धं जातं तत्तदनुकम्पापरै र्विद्वद्भिः परिशोधनीयम् ।

श्रीगोपीमोहनकविराजस्य ।

KALANIDHI
Rare Book Collection
ACC No.: R-318
IGNCA Date: 25.3.08

# मुक्तावली ।

ओंगणेशाय नमः ।

ब्रह्मेन्द्रादित्रिदशपरिषन्मौलिमन्दारमाला-
बालार्कांशुप्रसृमररजोराजितांघ्रिद्वयश्रीः ।
श्रीमन्नीलः क्षितिधरशिरोदेशसंवेशहृष्टः
कृष्णोजीयादखिलजगतां शर्म्मकर्म्मैकहेतुः ॥
पूर्व्वं लोकहिताय माधवकरोऽभिख्योभिषक्केवलं
कोषान्वेषणतत्परः प्रविततायुर्व्वेदरत्नाकरात् ।
मालां रत्नमयीं चकार स यथालाभं न शोभाधिका
साध्याभिः कमनीयभक्तिरचनाद्धारान्यथा ग्रथ्यते ॥
उत्तमगुणपरिणामा सौकर्य्यादल्पबोधतिमिरघ्नी ।
संप्रति सुधियां हृदये विलसतु पर्य्यायमुक्तावली ॥
श्रेष्ठश्लोकविहीनगन्धलसिकारत्नैः सुधात्वादिभिः
स्वाद्वम्लोत्तमतिक्तशाकसुमनोवल्लीफलांघ्रीभवैः ।
उच्चैर्मध्यमह्रस्वपादपलताधान्यद्वयान्नादिकैः
पानावश्यकभौतिकादिकरसैर्वर्गः क्रमान्निर्णयः ॥

सुगन्धिगणः।

कर्पूरागुरुगन्धसारसरलस्थौलेयदेवाह्वयै
स्त्वातुर्ज्जातकदैत्यकुङ्कुमजटाकक्कोलजातीफलैः।
कस्तूरीकपिपूतिगन्धिगिरिजश्रीवेष्टनीरास्रजै
श्चण्डाकोषलवङ्गकुन्दुरुनखैरुक्तः सुगन्धिर्गणः॥

कर्पूर।

घनसारश्च कर्पूरं सोमसंज्ञं सिताभ्रकम्।
भृङ्गारपत्रा मिहिका साश्मगोहिमवालुका॥

चीनकर्पूर।

कृत्रिमश्चीनकर्पूरो नलदश्चन्द्रकः कटुः॥

अगुरु।

अगुरुः शृङ्गजं कृष्णं लोहाख्यं लघुजोऽङ्गजम्॥

Indira Gandhi National

कृष्णागुरु।

कृष्णागुरुःस्याद्वसुकं मङ्गल्यं विश्वरूपकम्॥

सामान्यचन्दन।

भद्रसारं मलयजं गन्धसारश्च चन्दनम्॥

श्रीखण्डचन्दन।

चन्द्रकान्तश्च गोशीर्षं श्रीखण्डं भोगिवल्लभम्॥

श्वेतचन्दन।

भद्रश्रीः सोमयोनिश्च महार्हं श्वेतचन्दनम्॥

हरिचन्दन।

पीतसारं सुपीतञ्च वर्व्वरं हरिचन्दनम्॥

कृष्णचन्दन।

कालीयकञ्च कालेयं गन्धवासं हरिप्रियम्॥

सरलकाष्ठ।

पीतदारु मनोज्ञञ्च सरलो भद्रदारु च॥

गेठेला।

स्थौलेयकं ग्रन्थिपर्णं कुशपुष्पञ्च ग्रन्थिकम्॥

देवदारु।

सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च।
देवकाष्ठञ्च पीतद्रु देवदारु च दारु च॥

त्रिजातक। चातुर्जातक।

त्वक्पत्रैलं त्रिजातं स्याच्चातुर्ज्जातं सकेशरम्॥

गुड़त्वक्।

भृङ्गं वराङ्गं रामेष्टं विज्जलं त्वचमुत्कटम्॥

एलवालुक।

एलवालुकमैलेयं सुगन्धि हरिवालुकम्॥

तेजपत्र।

वस्त्राद्यं पत्रिकं पत्रं तेजपत्रं तमालकम्॥

एलाइच।

एला च बहुला स्थूला मालेया ताड़कीफलम्॥

क्षुद्रएलाइच।

वयःस्था तीक्ष्णगन्धा च सूक्ष्मैला द्राविडिःत्रुटिः॥

नागेश्वर।

द्विपसर्पसुवर्णाह्वञ्चाम्पेयो नागकेशरः॥

सुरामांसी।

गन्धिनी तालपर्णी तु दैत्या गन्धकुटी मुरा॥

कुङ्कुम।

काश्मीरजं कुङ्कुमञ्च वाह्लीकं शोणितन्द्वयम्॥

जटामांसी।

नलदं नन्दिनी पेषी मांसी कृष्णजटा जटी।

किरातिनी च जटिला लोमसा तु तपस्विनी॥

आकाशमांसी।

लघुमांसी भूतजटाकाशमांसी पिशाचिका॥

काकोली।

कक्कोलकं कोषफलं कोलकं मालवोद्भवम्॥

जायफल।

जातीफलं मज्जसारं शालूरं सुमनःफलम्॥

जयित्री।

जातीकोषं जातिपत्र सुमनोपत्रिकापिच॥

कस्तूरी।

मृगनाभिर्मृगमदोमदः कस्तूरीकाण्डजा॥

लताकस्तूरी।

श्यामा तिक्ता पूतिमुख्या लतिका गन्धवेलिका॥

शिलारस।

कपिनामा कपित्तैलं कृत्रिमं कपिशश्चलः।

तुरुष्कोयुक्ति-युक्तश्च पिण्डितः सैह्लिकारसः॥

पूतनी।

पूतिगन्धिः पूतिकट्या तिर्य्यगामिषगन्धिनी॥

शैलज।

शैलाख्यं शैलजं वृद्धं सुभगं गिरिपुष्पकम्॥

लवनखोटी॥

तैलपर्णी दधिश्रद्धा पिन्याकोरक्तशीर्षकः।

वेष्टोरसाढ्यः श्रीवासः श्रीपिष्ट-सानवीरसः॥

वाला।

कर्पूरतैलं पर्णीरं जलाढ्यं मकरन्दजम्॥

पद्मकाष्ठ।

पद्मकाष्ठं पीतकाष्ठं कैदारं पद्मसंज्ञितम्॥

पिडङ्ग।

तस्करश्चोरकश्चण्डा ध्वङ्क्षादेवी लता लघुः॥

लवङ्ग।

लवङ्गं देवकुसुमं श्रीसंज्ञं कलिकोत्तमम्।

भृङ्गारं शुषिरं तीक्ष्णं वारिजं शेखरं लवम्॥

कुन्दरुखोटी।

पालिन्दी सिखि कुन्दः स्यान्मुकुन्दः कुन्द कुन्दुरुः॥

नखी।

करजाख्यस्याद्व्युरोनखोव्याघ्रनखोनखी।

नखीभेदः।

नखोऽन्यः स्याच्छङ्खनखः कूटस्थश्चक्रनामकः।

चारिश्चक्षेष्ठगन्धः पर्य्यायैराकृतोगणः॥

इति पर्य्यायमुक्तावल्यां कर्पूरादिसुगन्धिवर्गः प्रथमः॥

जीराजमोदामधुरायमानीकोषाम्बुदौशीरकचोरकुष्टैः।

शताह्वमालातृणधान्यमेथीनचाभियुक्ताः किलमध्यगन्धाः॥

बड़जीरा।

अजाजी जरणं जीरं मागधं जीरकं सितम् ॥

क्षुद्रजीरा।

हृद्यगन्धं सुगन्धञ्च द्वितीयं कणजीरकम् ॥

कालजीरा।

कारवी जीरकं कृष्णं पृथ्वीका चोपकुञ्चिका ॥

क्षुद्रकालजीरा।

कालोपकुञ्चिका तत्र सूक्ष्मेतु सुषवी पृथुः ॥

वनयमानी।

अजमोदा तूग्रगन्धा ब्रह्मदर्भाजगन्धिका ॥

यमानी।

यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥

मङ्करी।

अवाक्पुष्पी तु छत्रा स्यान्मङ्गल्या मधुरा मिषी॥

त्रिकटु।

त्रिकटु त्रुषणं व्योषं कृष्णामरिचनागरैः॥

पिप्पली।

उषणा पिप्पली शौण्डी वैदेही मागधी कणा।

कृष्णोपकुल्या मगधा कोला स्यात्तीक्ष्णतण्डुला ॥

मरिच।

वेल्लनं मरिचं कृष्णमुषणं धर्म्मपत्तनम् ॥

शुण्ठी।

विश्वं महौषधं शुण्ठी नागरं विश्वभेषजम् ॥

मुता।

मेघाख्यं मुस्तकं मुस्तं वालेयं परिपेलवम्॥

नागरमुता।

गाङ्गेयं कुरविल्लञ्च भद्रमुस्तं कुटन्नटम्॥

गन्धवेणा।

उशीरमभयं सेव्यं नामञ्जकस्तथालकम्॥

वेणा।

वितालमूलं विरणं वीरं वीरतरं तथा॥

शठी।

जीमूतमूलं कच्चोरं पालाशा हिमजा शठी॥

गन्धशठी।

कर्बूरकोद्राविड़कः काल्यकोवेधमुख्यकः॥

घोडाशुण्टी।

कैतर्य्यश्चोरकः शुण्टी च द्रः श्वेताख्यनामकः॥

कुड़।

व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलम्।

पुस्करमूल।

पुस्करं पौस्करं कुष्ठमूलं स्याद्ब्रह्मतीर्थकम्॥

शलुफा।

शताह्वा शतपुष्पाख्या त्वतिछत्रा च कारवी॥

गन्धमात्रा।

ग्रन्थिनं ग्रन्थिखेटञ्च मूलात्तुणक-भूस्तृणे॥

धने।

कुस्तुम्बुरुस्च धन्याकं वेधणोग्रा वितानकम्॥

मेथी।

मेथीका मदनी मेथी गन्धबीजा च कैरवी।
वल्लरी चन्द्रिका मण्डा मिश्रपुष्पा च वेधसी॥

वच।

तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा।
षड्ग्रन्थोग्रा च रक्षोघ्नी सिता हैमवती च सा॥

खुलावच।

मेध्या षड्ग्रन्थिका श्वेता वचा स्याद्दीर्घपत्रिका॥

भैरवीवच।

कुलिञ्जोगन्धमूलश्च तीक्ष्णगन्धश्च बर्ब्बरः॥
सप्तभिश्चैः समाख्यातः पर्य्यायैर्मध्यगन्धकः॥

इति पर्य्यायमुक्तावल्यां जीरकादिमध्यगन्धवर्गो द्वितीयः॥

Indira Gandhi National
Centre for the Arts

शृङ्गीकट्फलरेणुककं क्रिमिरिपुत्रायन्तिकावल्गुजा
जिङ्गीतिक्तयुगाहणाफणिवराद्व्यग्रादाक्षीरुदाः।
जीवन्तीनतपुण्ड्रलोध्रचनिकाम्भोजाटवर्गेन्द्रजा
रास्नानागवलेभरक्तमदनाहीनाख्यगन्धाः स्मृताः॥

काकडाशृङ्गी।

कर्कटाख्या महाघोरा शृङ्गी कर्कटशृङ्गिका।
कुलीरशृङ्गी चक्राङ्गी कुलिङ्गा कासनाशिनी॥

कट्फल।

कट्फलः सोमवल्काख्यः कुम्भी भद्रा च मोहिनी॥

रेणुक ।

हरेणु रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी ॥

विडङ्ग ।

जन्तुघ्नं भस्मकं विल्लं क्रिमिघ्नं चित्रतण्डुलम् ।
क्रिमिघ्नस्तु विडङ्गश्च गह्वरं तत्र कैरवम् ॥

वलालता ।

त्रायमाना सुभद्राणी त्रायन्ती भद्रनामिका ॥

सोमराजी ।

वागुजी चन्द्रलेखा स्यात् सोमराजीत्ववल्गुजः ।
कृष्णपूतिफला कुष्ठनाशिनी सा सिता-परा ॥

मञ्जिष्ठा ।

मञ्जिष्ठा विकषा जिङ्गी कालायोजलपर्ण्यपि ।
ताम्रवल्ली चित्रपर्णी गण्डीरी रक्तयष्टिका ॥

कटुकी ।

तिक्तकाण्डेरुहा-रिष्टा चक्राङ्गी शकुलादनी ।
तिक्तरोहिणिका चैव कटुका कटुरोहिणी ॥

पीतकटुकी ।

नेत्रामयहरा चान्या कटुका पीतरोहिणी ॥

चिराता ।

किराततिक्त-कैरात-भूनिम्बं काण्डतिक्तकम् ॥

आतइच् ।

काश्मीरा-तिविषा-श्वेता विषा प्रतिविषा-रुणा ॥

मसिना ।

चणकोमातसी चान्या क्षुमा शृङ्गी मनप्रिया ॥

प्रियङ्गु।

विष्वक्सेना प्रिया कान्ता प्रियङ्गुः फलिनी फली॥

त्रिफला।

हरीतक्यक्षधात्रीभिस्त्रैफलं त्रिफला वरा॥

हरीतकी।

अभया त्वव्यथा पथ्या वयःस्था पूतना-मृता।

हरीतकी हैमवती चेतकी श्रेयसी शिवा॥

बहेड़ा।

कलिद्रुमः कल्यवृक्षः सम्बर्त्ता-क्षोऽविभीतकः॥

आमला।

वयःस्था-मलकी धात्री तीर्थ्या कर्षफला-मृता॥

दुरालभा।

यासोयवासोदुःस्पर्शो धनुर्यासः कुनासकः।

रोदनी कच्छुरा-नन्ता समुद्रान्ता दुरालभा॥

दुरालभाभेद।

ग्राहिणी कच्छुरा चान्या ताम्रमूला मरुद्भवा॥

दारुहरिद्रा।

कटं कटोरिपीत द्रुकालेयकहरिद्रवः।

दार्व्वी पचम्पचा दारुहरिद्रा पर्ज्जनीत्यपि॥

तालीशपत्र।

नीलाम्बर चार्कवेध तालीशं पल्लवाह्वयम्॥

तगरपाद।

कालानुसारिवा वक्रं तगरं कुटिलं शठम्।

महोरगं नतं जिह्मं दीनं तगरपादकम्॥

पुण्डरियाकाष्ठ।

प्रपौण्डरीकं पुण्डर्य्यं भूतघ्नी श्रवणा-ह्वया॥

पुण्डरियाभेद।

प्रपौण्डरीकं चक्षुष्यं प्रोतं श्रीपुष्प-मुण्डरी॥

लोध।

तिरीटोमार्ज्जनोरक्तोलोध्रोलोध्रस्तु तिल्वकः॥

पाटियालोध।

शुक्लः शबर-लोध्रोऽन्योमहालोध्रस्तु शाबरः॥

चई।

चव्यं तेजोवती कोला नाकुली च त्रिकोषणा॥

सिङ्गलीच्छोप।

काला-मुसाह्विा-म्लोजा भरोष्ठा सिङ्गली सिता॥

अष्टवर्ग।

जीवकर्षभको मेदोमहामेदर्ड्डिवृद्धिका:।

काकोली चीरकाकोलीत्यष्टवर्गोऽयमीरित:॥

जीवन्ती।

सुवर्णवर्णा जीवन्ती दुर्लभा चयनाम्निनी॥

ह्रस्वाङ्गोजीवक: कूर्च्चोदीर्घायु: श्चङ्कप्रिय:॥

ऋषभक।

ऋषभोदुर्द्धरोद्रा चोवल्लु रोमाल्टकोत्पः॥

मेद।

मेदा धीरा मणिच्छिद्रा मधुरा जीवनी रसा॥

महामेद।

महामेदा देवमणिर्वसुच्छिद्रा त्रिपाण्डुरा॥

ऋद्धि।

ऋद्धिः प्राणप्रिया हृद्या जीवा तु सम्पदाह्वया॥

वृद्धि।

वृद्धिर्योधनिका चैव प्रिया ऋद्धि सुरत्तमा॥

काकोली।

वीरा पयस्या काकोली ध्मा क्षोणी सीतपाक्यपि॥

क्षीरकाकोली।

शुक्लानी [illegible]काकोली जीववल्ली पयस्विनी॥

कुडची।

कुटजः शक्रपर्य्यायोवत्सकोगिरिमल्लिका॥

इन्द्रयव।

तत्फलं कोटजं चेन्द्रयवश्चापि कलिङ्गकः॥

गन्धरास्ना।

रास्ना युक्तरसा युक्तश्रेयसी सुवहावहा।
सुगन्धा सर्पगन्धाख्या नाकुली गन्धनाकुली॥

सामान्यरास्ना।

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा॥

गोरक्षाकुल्या।

गाङ्गेरुकी नागवला भसा ह्रस्वगवेधुका।
खरधन्व-निका विश्वदेवा गोरक्षतण्डुला॥

गजपिप्पली।

श्रेयसी कोलवल्ली च गजाह्वा हस्तिपिप्पली॥

रक्तचन्दन।

तिलपर्णी ताम्रसारश्चन्दनं रक्तचन्दनम्॥

रक्तचन्दनभेद।

पत्तङ्गं रञ्जनं रक्तं पताङ्गञ्च कुचन्दनम्॥

मयनाफल।

मदनः श्वसनो राढो गालः पिण्डीतकः फलम्।
छर्द्दनो विषपुष्पञ्च करहाटश्च शल्यकः॥

काटामयना।

पिचुको मुचुकोकुन्दः कण्टकी मदनोमतः॥

हीनद्रव्यगुणः षड्भिश्चत्वारिंशद्गणैः कृतः।
इति पर्य्यायमुक्तावल्यां कर्कटाख्यादिहीन
गन्धवर्गस्तृतीयः।

Indira Gandhi National
Centre for the Arts

क्षाफेणपिच्छालवणाभिजात-
लिचारवांसीखदिराब्धिफेणैः।
गोरोचनासालजहिङ्गुबोल
लाक्षापुरैः सारजवर्गउक्तः॥

आफिङ्ग।

मादकञ्च अहीफेणोऽहाफुः परमपूतिलः॥

मोचरस।

शाल्मलः शाल्मलीवेष्टः पिच्छा मोचरसस्तथा॥

सैन्धव।

सिन्धूद्भवं मानिमन्थं नादेयं लवणोत्तमम्॥

सचललवण।

रोमकं रोमलवणं वसुकं सचलं मतम् ॥

सामुद्रलवण।

सामुद्रं लवणं यत्तु त्रिकूटं माचिकं शिवम् ॥

विटलवण।

विड्गन्धि काललवणं विड़ं विड़्लवणं तथा ॥

सौवर्च्चल लवण।

रुचकं कृष्णलवणं माचं सौवर्च्चलञ्च तत् ॥

फुलालवण।

उष्मं तथोद्भिद पाक्यं लवणं पांशुजं तथा ॥

शिलाजतु।

शिलाजत्वश्मजं शैलं शिलोत्थञ्च तथाद्रिजम् ॥

चारत्रयं।

चारत्रयं यावशूकस्वर्ज्जिकाटङ्कणैरपि ॥

यवचार।

पाक्यचारोयावशूकोयवचारोयवाग्रजः ॥

साचिचार।

कापोतः खर्ज्जिका सर्ज्जिः शूलघ्नी सुखवर्च्चनः।

सोहागा।

लोहद्राविटङ्कणञ्च शुभगोधातुवल्लभः ॥

फटिकारी।

हेममित्रं शिवं श्वेतटङ्कणं सिन्धुसम्भवम् ॥

वंशलोचना।

स्याद्वंशलोचना वांसी कासघ्नी वंशजा शुभा ॥

खदिर।

गायत्र। बालतनयः खदिरोदन्तधावनः॥

शुक्लखदिर।

तत्श्वेतः तरुजः श्रेष्ठः कदरः सोमवल्कलः॥

विड्गन्धखदिर।

अरिमेदोविट्खदिरस्तिक्तसारश्च कण्टकी॥

समुद्रफेण।

हिण्डीरोऽब्धिकफः फेणः स सिन्धुरकफः स्मृतः॥

गोरोचना।

गोरोचना तु मङ्गल्या रोचना केशवप्रिया॥

धूना।

यक्षधूपः सर्ज्जरसोबालसर्ज्जस्तु सालजः॥

हिङ्गु।

सहस्रवेधा जतुकं बाह्लीकं हिङ्गु रामठम्॥

शिलाद्रल।

विड्ल्लोगोपकः पिण्डोबोल्लोगन्धिरसोरसः॥

लाक्षा।

क्रिमिजा-लक्तकौ लाक्षा यावोऽथ तु द्रुमालयः॥

गुग्गुलु।

जटायुः कालनिर्य्यासः कौशिकोगुग्गुलुः पुरः।
देवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा॥

पञ्चविंशतिभिःप्रोक्तः पर्य्यायैः सारजोगणः॥

इति पर्य्यायमुक्तावल्यां महाफेणादिसारजवर्गश्चतुर्थः॥

माणिक्यमुक्तास्फटिकप्रवालगोमेदवैक्रान्तकपुष्परागैः ।
सूर्य्येन्दुकान्ताश्मनिनीलराजावर्त्ताश्मगर्भादिभिराङ्करत्नम् ॥

सामान्यरत्न ।

रत्नं मणिर्भवेदश्मजातो मुक्तादिकेऽपि च ॥

माणिक्य ।

पद्मरागो लोहितको माणिक्यं शोणरत्नकम् ॥

श्रेष्ठमाणिक्य ।

पक्कदाडिमसंकाशं माणिक्यं शिखरं विदुः ॥

मुक्ता ।

अम्भःसारं शौक्तिकेयमिन्दुरत्नञ्च मौक्तिकम् ॥

मुक्ताशम्बुका ।

मुक्ताप्रसूश्चा तीकश्च शुक्तिर्मौक्तिकसम्पुटः ॥

Indira Gandhi National Centre for the Arts

स्फटिक ।

सैवसूकः श्वेतरत्नं स्फटिकोनिस्तुषोपलम् ॥

पला ।

प्रवालोभौमरत्नं स्याद्विद्रुमो गोपिवल्लभः ॥

गोमेद ।

पिङ्गस्फटिक-गोमेदो ऽगस्तिसत्त्वं तमोमणिः ॥

वैक्रान्त ।

वैक्रान्तं नीचकुलिशं गोनासं क्षुद्रवज्रकम् ॥

पुष्पराग ।

पु परागो जीवरत्नं पीतस्फटिक इत्यपि ॥

सूर्य्यकान्त ।

दीप्तोपलः सूर्य्यकान्तोज्वलनाला-ग्निगर्भकः ॥

चन्द्रकान्त।

चन्द्रकान्तं सोममणिः सिताश्म-मस्तरोपलम्॥

हीरक।

हीरकं वज्रम-ग्रिरं षट्कोनं दृढगर्भकम्॥

नीलहीरक।

शौरिप्रियं तृणग्राहि नीलमिन्द्रोपलं तथा॥

राजावर्त्त।

आवर्त्तः मणिकावर्त्तो राजावर्त्तो नृपाह्वयः॥

मरकत।

मारुमतं मरकतं न-श्मगर्भं हरिन्मणिः॥

वैदूर्य्य।

वैदूर्य्यं राहुकं केतुरत्नं मेघखना च रम्

Indira Gandhi National
Centre for the Arts

वज्रञ्च मौक्तिकञ्चैव माणिक्यं नीलमेव च।
तथा मरकतं चेयं महारत्नानि पञ्चधा॥
गोमेदं पद्मरागञ्च वैदूर्य्यञ्च प्रवालकम्।
उपरत्नानि चत्वारि नवरत्नमिदं मतम्॥
इत्यन्यान्यपि रत्नानि ज्ञातव्यानि प्रयोगतः।
रत्नवर्गस्त्रिभिरत्नैश्चतुर्दशभिरीरितः॥

इतिपर्य्यायमुक्तावल्यां माणिक्यादिरत्नवर्गः पञ्चमः॥

श्रेष्ठः पारद एव हेम रजतं म्लेच्छास्यकालायसं
रीतिर्घोषकवङ्गघोशकमिति ज्ञेया बुधैर्धातवः।
हिङ्गुलाञ्जनतुत्थमेवविमलासिन्दूरदार्व्यद्रिज-
हृन्याखाङ्गशिलालमाक्षिकविषैः प्रोक्तोपधात्वाकृतिः ॥

पारा।

हरवीजं रसः सूतः पारदश्चपलोऽच्युतः ॥

सुवर्ण।

स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम्।
भर्म्म चामीकरं रुक्मं शातकौम्भञ्च काञ्चनम् ॥

रूपा।

खर्ज्जुरं रजतं श्वेतं तारं दुर्वर्ण-रूप्यकम् ॥

ताम्र।

रक्तं वरिष्ठं म्लेच्छास्यं ताम्रं शुल्ब-मुडुम्बरम् ॥

लौह।

लोहोऽयःसस्त्रकं तीक्ष्णं पिण्डं कालायसा-यसी ॥

रुक्मलौह।

वर्त्तलोहं तीक्ष्णलोहं नीलिका पुटलोहकम् ॥

कान्तलौह।

दिव्यं लोहम-यस् कान्तं कृष्णायोलौहकान्तकम् ॥

लौहकिट्ट।

सिंहानं किट्ट-मण्डूरं लोहकिट्टमयोमलम् ॥

पित्तल।

पिङ्गलं पित्तलं रीति वारं कूटं कुकाञ्जनम् ॥

कांस्य।

कंसं सौराष्ट्रकं घोषं दीप्तलौहञ्च कांस्यकम्॥

राङ्।

रङ्गं वङ्गञ्च कस्तीरं स्वङ्गं पिच्चटं त्रपु॥

सीसा।

नागं बङ्गमलं चीनं पिष्टं गोवेष्ट सीसकम्॥

हिङ्गुल।

हिङ्गुलं दरदं रक्तं हंसपादं रसोदरम्॥

चतुर्व्विधाञ्जन।

चतुर्व्विधाञ्जनं तार्क्ष्यं स्रोतःसौवीरकृत्रिमैः॥

रसाञ्जन्।

रसाञ्जनञ्च कृतकं तार्क्ष्यं शैलं रसाग्रजम्॥

स्रोतोऽञ्जन।

स्रोतोऽञ्जनं नदीजञ्च वाल्मीकञ्च जयानलम्॥

सौवीराञ्जन।

सौवीरकं पार्व्वतेयं मेचकं नीलमञ्जनम्॥

कृत्रिमाञ्जन।

पुष्पाञ्जनन्तु कौसुम्भं दार्व्वी क्वाथो-त्तमाञ्जनम्॥

तुते।

मयूरातुत्थं कांस्यनीलं तुत्थकं शिखिकण्ठकम्॥

अभ्र।

गौरीतेजो गौरीवीजं वङ्कपत्रं घनाह्वकम्॥

रूप्यमाक्षिक।

विमला माक्षिकश्रेष्ठा श्वेताभं तारमाक्षिकम्॥

सिन्दूर।

सिन्दूरं नागजं वीरं रक्तं सन्ध्यारुणं शिवम् ॥

खर्पर।

चक्षुष्यमक्ष्यतोत्थञ्च खर्परोदार्व्विका तथा ॥

गेरी।

गिरिमञ्जं गैरिकं रक्तधातुर्लोहितमृत्तिका ॥

स्वर्णगेरी।

सुवर्णगैरिकं चान्यत् सुरक्तं स्वर्णगैरिकम् ॥

खड़ी।

पाकशुक्लः शिलाधातुः कठिनीकः खटिः खड़ी ॥

दुग्धखड़ी।

दुग्धपाषाणिका क्षीरी साध्वी गोमेदसन्निभा ॥

पर्व्वतमृत्तिका।

सौराष्ट्री पार्व्वती मृत्स्ना कांसी स्याच्छ्लपर्पटी ॥

गन्धक।

गौरीवीजं वलिर्गन्धः पाषाणोगन्धकःस्मृतः ॥

कम्पिल्लक।

कम्पिल्लकस्तु रक्ताङ्गोरक्षाङ्गोरोचनिकेति सा ॥

मनःशिला।

मनःशिला च गोना च मनोज्ञा नागजिह्विका ॥

मनःशिलाभेद।

नैपाली कुनटी गोणा मनगुप्तो-त्तमाशिला ॥

हरिताल।

पिञ्जरं पिन्तरं तालमालञ्च हरितालकम् ॥

हरितालभेद।

छत्राङ्गं काञ्चनरसं गोदन्तं नटमण्डलम्॥

स्वर्णमाचिक।

माचिकं धातुमाचीकं ताप्यं स्वर्णाह्वयं मतम्॥

विष।

काकोली गरलः च्वेडो विषं स्यात्पारदोऽपि च।
सौराष्ट्रिकः शौल्किकेयोब्रह्मपुत्रः प्रदीपनः॥

तद्भेदाः।

स्थावरं जङ्गमं तच्च तस्याष्टादशभेदिका।
कालकूटं मयूराख्यं विल्लकं सक्तकं तथा।
वालुकं वत्सनाभश्च शङ्खनाभं सुमङ्गलम्॥
शृङ्गी कर्कटकं मुस्तं कद्दमं पौष्करं शिखी।
हारिद्रं हरिदं चक्रं विषं हलाहलाह्वयम्॥

उपविष।

अर्कधुस्तूरशीलुण्डलाङ्गलीकरवीरकम्।
गुञ्जाह्विफेणवज्राकमष्टोपविषजातयः॥

ईषनाङ्गलिया।

सैरी लाङ्गलकी दिप्ता हलिनी गर्भघातिनी।
अग्निजिह्वे-न्द्रपुष्पा-ग्निमुखी-वह्निशिखा च सा॥

दारुमोच।

भवेदाखुविषं दारुविषं पाषाणसञ्ज्ञितम्।
तद्भेदाः शङ्खगोदन्तादाडिमीस्फटीकादयः॥
आदिना गौरपाषाणनवाष्टौ पारदादयः॥
त्रयोविंशतिपर्य्यायैराख्यातोधातुसंग्रहः।
इति पर्य्यायमुक्तावल्यां धातूपधातुवर्गः षष्ठः॥

द्राक्षामोचनिकोठचोचपनसश्लेष्मातकाम्रमर्थ्यकाः
क्षीरीतालप्रियालपूगमधुकस्नुग्दारुबिल्वानलाः।
खर्ज्जुरेक्षुमधूलितिन्दुकमधुक्रोष्टुस्नुवौष्ठीवरीत्वक-
क्षीरीश्रवणावलास्तु मधुराभिख्ये गणे कीर्त्तिताः॥

द्राक्षा।

मृद्विका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च॥

कदली।

कदली वारणवुषा रम्भा मोचांशुमत्फला॥

धलाआकड़ा।

अङ्कोठस्तु निकोठः स्यादङ्कनोरोमनोऽपि च॥

नारिकेल।

चोचनाम्नी पयःपेटी नारिकेलस्तु लाङ्गली॥

पनस।

पनसः कण्टकिफलो ह्रिपः कुपनसः स चेत्॥

चालता।

शेलुः श्लेष्मातकः शीत उद्दालोवङ्कवारकः॥

गम्भारी।

श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका।
कुमुदा च सदाभद्रा कट्फला कृष्णवृन्तिका॥

क्षीरिवृक्ष।

राजादनः क्षीरिवृक्षः फलाध्यो वानरप्रियः॥

ताल।

तृणराजाह्वयस्तालः सोपि लेखः शताङ्गुलः॥

पियाल।

राजादनः पियालः स्यात् सन्नकद्रुर्धनुष्पटः॥

गुवाक।

घोण्टा तु पूगः क्रमुकोगुवाकः खपुरोऽपिच॥

यष्टिमधु।

मधुकं क्लीतकं यष्टीमधुका मधुयष्टिका॥

वइची।

विकङ्कतः स्वादुकण्टः स्रुग्वाह मधुपर्ण्यपि॥

बेल्।

बिल्वोमहाकपित्थाख्यः श्रीफलो गोहरीतकी।
पूतिवातोऽथ मङ्गल्यो मालूरश्रीफलावपि॥

भेला।

भल्लातकोऽरुष्करश्च भल्लातः शोथहृत्तथा।
वह्निनामा वीरतरुर्व्रणकृद्भूतनाशनः॥

तङ्गर।

टषकः स्याङ्गोजनकोनदीभल्लातकोमतः॥

खर्ज्जूरः।

स्वाद्वाद्यः पिण्डखर्ज्जूरः खर्ज्जूरी ग्रामजा-परा॥

इक्षु।

महारसोऽसिपत्रःस्याद्बहुपुष्पोमधुतृणः।
रसनेष्टोरसालः स्यादिक्षुश्च मधुराकरः॥

इक्षुभेद।

तद्भेदाः पुण्ड्रकान्तारनैपालीशतपर्व्विकाः॥

मङ्गल।

मधुपुष्पोमधूकश्च गुड़पुष्पोमधुद्रुमः॥

गिरिजमङ्गल।

गौरसान्यो मधुन्यो ऽन्योगिरिजः स्वल्पपत्रकः॥

गाव्।

तिन्दुकः स्फूर्जकः कालस्कन्दश्च शितसारकः॥

माकुडागाव्।

काकेन्दुः कुलकः काकः पिलुवकः काकतिन्दुकः॥

मधु।

मधु पुष्परसं चौद्रं मकरन्दश्च माचिकम्॥

सियाकुल्।

शृगालकोलिः कर्कन्धुः क्रोष्टुनामा वनोद्भवः॥

मुर्गा॥

मुर्व्वा देवी मधुरसा मोरटा तेजनी स्रुवा।
मधूलिका धनुःश्रेणी गोकर्णी पीलुपर्ण्यपि॥

तेलाकुचा।

ओष्ठी रक्तफला विम्बी तुण्डिकेरी च विम्बिका॥

शतमूली।

शतमूली वङ्कसुता भीरुरिन्दीवरी वरी।
ऋष्यप्रोक्ता भीरुपत्नी नारायण्यः शतावरी॥

तालचीर पात्त इतिकेचित्।

चीरशुक्ला तुगाचीरी त्वक्चीरी पार्थिकी तु सा॥

मुण्डीरी।

अलम्बुषा मुण्डरिका श्रावणी च पलङ्कषा॥

सुखडीरीभेद।

कदम्बपुष्पी श्रवणा भूतघ्नी कुम्भवारुणी॥

वेडेला।

वाट्यालकं वाट्यपुष्पं समांसा विजया बला॥

श्वेतवेड़ेला।

ऋष्यप्रोक्ता त्वतिबला पीतपुष्पा महाबला॥

सप्तविंशतिपर्य्यायैराख्यातोमधुरोगणः।

इति पर्य्यायमुक्तावल्यां द्राक्षादिमधुरवर्गः सप्तमः॥

SANS 615.536 AYU

दाडिम्याम्रकपित्थजम्भकरुणारुच्याख्यनिम्बामलै-
र्जम्बूकारुककरमर्द्द नवनीभव्याम्लकैरावतैः।
चिञ्चावेतसपरूषकोलिलिकुचाम्रातपूरारुणै-
र्द्रव्यैरेभिरुदीरितः परिमितैरम्लाभिधानोगणः॥

दाडिम।

दाडीमं जाडिमी रक्तपुष्पमम्लोहमञ्च यत्॥

आम्र।

आम्रश्चूतोरसालोऽसौ सहकारोऽतिसौरभः॥

कपित्थ।

कपित्थोमन्मथोग्राही दधित्थोदोषपाचनः॥

लेबु।

स्युर्जम्बीरे दन्तशठजम्भजम्बीरजम्भलाः॥

करुणालेबु।

सुरङ्गं करुणाम्लाक्षमथा विषमवल्कलः॥



IGNCA RAR
R-318
ACC. NO.

जीवन्ती वास्तु टङ्कं स्वपनवचनकालिङ्गिका मेघनादः
पिण्या लोहन्नवह्निः स्वयथुकासहृत् काकमाची रथाङ्गी।
नालीतीक्ष्णौ कलम्बी सलटुकसिकता पूतिका कोषलाह्वा
पालङ्करड गजाश्वमदहहिलमुची सार्षपं पत्रशाकम्॥

जीवन्तीशाक।

जीवनी जीवशाका च जीवन्ती गुणवत्तरा॥

वेतोशाक।

राजशाकश्चक्रवर्त्ती वास्तूकः स च वास्तुकः॥

वेतोशाकभेद।

दलाम्लं वरवकं चाम्लं वास्तुकं टङ्कदेशकम्॥

सुषणीशाक।

निद्राकरं पुञ्जदलं चित्तन्नं सुनिन्नकम्॥

ब्रह्मीशाक।

मत्स्याक्षी सुस्वरा ब्राह्मी वयःस्था ब्रह्मचारिणी॥

ब्रह्मीशाकभेद।

शिवब्रह्मी क्वचिच्छङ्खपुष्पी भूधरपत्रिका॥

कुरयाशाक।

शुक्रपुष्पः कुरवकस्तिलकः कुरकोऽपि च॥

काटानटे।

मेघनादोविषहरोमेघाख्यस्तण्डुलीयकः॥

नताफट्की।

पारावतपदी पिण्या लवणा-स्फुटवल्कला।
ज्योतीष्मती पीततैला केचित्तामिङ्गुदीं विदुः॥

शालिञ्चा।

शालिञ्चः शितशाकश्च पत्तुरो लौहमारकः ॥

चिता।

चित्रको वह्निनामा च पाची श्वेता-कृष्णा तु सा ॥

पुनर्णवा।

पुनर्णवा तु शोथघ्नी वर्षाभूः शाटषायणी।

कठिल्लको ऽरुणा श्वेता दृश्चीरः शाशिवाटिका॥

कालकासन्दा।

कालिङ्गतः कोरिमदः कासमर्द्दश्च कर्कशः॥

गुडकामाइ।

रसायनी काकमाची वायसी तु घनावहा॥

कानसिडा।

अस्याश्च यानि नामानि कानसीडायाश्च तद्भवेत्॥

दद्रुआति पुरती इति भाषा।

चक्राङ्गी हृषपर्णी च दध्याली स्यात् सुदर्शना॥

नालिताशाक।

नागवल्ली दलानाली रुच्या नालावती च सा॥

सजिनाशाक।

शोभाञ्जने शिग्रु-तीक्ष्णगन्धका-चीवमोचकाः॥

सजिनाभेद।

रक्तोऽसौ मधुशिग्रुः स्यात् सुरङ्गी सुशुभञ्जना॥

कलमीशाक।

कलम्बी पोट्टिका लभ्या तद्भेदा कृष्णपल्लवा॥

नटेशाक ।

वृत्तपत्रः सलटुकोदरदः शरदुद्भवः ॥

वनसुनियाशाक ।

सिकता घोनिका गौणी करखटु कम्बलांशुकम् ॥

पुइशाक ।

उपोदिका मोदनी च मदघ्नी पिच्छलच्छदा ॥

खोषला ।

कोषलाह्वा शाकवरो जीवशाकः प्रणालकः ॥

पालङ् ।

पालङ्क्या-हिमजा ग्राम्यवल्लभा चुरकाम्लिका ॥

टक्पालङ् ।

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ॥

चाकन्दा ।

दद्रुघ्नः स्यादेडगजः प्रपन्नाडस्तु तर्किनः ॥

लङ्कामरिच् ।

दग्धास्याद्धस्तीच्णपत्रः चुद्रद्रुः कुमरिचकः ॥

हिलिञ्चा ।

जलप्रिया हिलमुची हिलमोचीति वा क्वचित् ॥

शर्षप ।

कदम्बकस्तन्तुभः स्यात् शर्षपः स्नूरसाधनः ॥

श्वेतशर्षप ।

रचोभूतः पिसाचघ्नः सिद्धार्थोगौरशर्षपः ॥

राड़्मर्षप।

क्षवः क्षुधाभिजनकोराजिका कृष्णका-सुरि।
षड्विंशतिपर्य्यायै राख्यतः शाकजोगणः॥

इति पर्य्यायमुक्तावल्यां जीवन्तराद्युक्तमशाकवर्गोनवमः॥

---

पाठामेषकपारिभद्रविजयाभूनीपवाणास्मृता
भेकीवासकपञ्चमूलशिखरीपेटीजयाग्रन्थिकैः।
कालोपर्प्पटरक्तिकासुखुरभोद्रोणाख्यराजक्षुरै
र्गन्धालीतिपदीप्रकीर्य्य वंशिरैः स्मार्त्तिकशाकोगणः॥

आक्नादि।

अम्बष्ठा-म्बष्ठिका पाठा कुबेली पापचेलिका।
एकाष्ठीला वरातिक्ता प्राचीनै-कशिखा स्मृता॥

मेढ्शृङ्गी।

नन्दीवृक्षोमेषशृङ्गी तथा मेषविषाणिका।
चक्षुर्वङ्गल-पुष्पश्च मेढ्शृङ्गी स्तह्रुमः॥

पालिधामादार्।

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः॥

सिद्धि।

शक्राशनस्तु विजया त्रैलोक्यविजया जया॥

कुक्सिमा।

अलम्बुषस्तु गुच्छालो भूकदम्बः कोलाहलः॥

नीलभिंरण्टी।

सैरीयकः सहचरोवाणोनीलकुरण्टकः॥

पीतझिण्टी।

बाणः सहचरः पीतपुष्पोदासी कुरण्टकः॥

गुलञ्च।

वत्सादनी छिन्नरुहा मधुपर्ण्यमृता-वरा।
कुण्डल्यऽमृतवल्ली च गुडूची चक्रलक्षणा॥

थुल्कुड़ि।

भेकी मण्डुकपर्णी च मण्डूकी मूलपर्ण्यपि॥

वासक।

सिंहास्योवाजिदन्तश्च वृषोवासाटरूषकः॥

ह्रस्वपञ्चमूल।

पञ्चमूली वृहत्यौ द्वे पर्णिन्यौ गोचुरं तथा॥

कण्टकारी।

अनाक्रान्ता स्पृशी व्याघ्री भण्टाकी च निदिग्धिका।
सिंही धावनिका क्षुद्रा वृहती कण्टकारिका॥

व्याकुड़।

भण्टाकी वृहती सिंही वार्त्ताकी राष्ट्रकाकुली॥
प्रसहा चक्रवाकी च लताबृहतिका-परा॥

शालपर्णी।

ध्रुवा.विदारी गन्धाख्या शालपर्ण्यंशुमत्यपि।
सा त्रपतसमापत्री दीर्घमूला स्थिरा च सा॥

चाकुले।

पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टपुच्छिका।
चित्रपर्णी तु कलसी गुहा क्रोष्टुकमेखला॥

गोक्षुरी ।

पलङ्कषात्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥

अपमार्ग ।

स्थूलमञ्जर्य्यपामार्गः प्रत्यक्पुष्पी मयूरकः ।
क्षारमध्यक्षवधोघण्टा शिखरी खरमञ्जरी ॥

पेटारि ।

कुबेराक्षी कुलिङ्गाक्षी पेटिका कालहन्तिका ॥

जयन्ती ।

जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥

पिप्पलीमूल ।

ग्रन्थिकं पिप्पलीमूलं षड्ग्रन्थिः कटिकाशिरः ॥

विछाटि ।

सर्पदंष्ट्रा महाकाली क्रोष्टू क्षुरपत्रिका ।
वृश्चिपत्री वृश्चकाली विषघ्नी नागदन्तिका ॥

क्षेत्पापड़ा ।

त्रिवष्टिः पर्पटस्तिक्तस्वरको वक्रकण्टकः ॥

कुच ।

गाङ्गुष्ठा कृष्णला गुञ्जा रक्तिका काकचान्तिका ।
काकादनी काकतिक्ता काकजंघा शिखण्डिनी ॥

इन्दुरकानी ।

प्रत्यक्श्रेणी द्रवन्ती च पुत्रश्रेण्याखुपर्णिका ।
वृषपर्ण्याखुपर्णी च मूषिका फञ्जपत्रिका ॥

वावुइतुलसी।

सुरभी तुलसी नन्दा सुरसा प्रेतराघसी॥

द्रोणपुष्प।

द्रोणपुष्पी च गोशीर्षो ग्रन्थिलः शङ्करप्रियः।

केसुरिया भृङ्गराज।

भृङ्गराजः केशराजो भृङ्गः पत्तङ्गमार्करी॥

कुलेकाडा।

कोकिलाक्षो वीरतरुस्त्रिचुरः खुरकस्तथा।

शुक्लपुष्पश्छत्रकः स्यात् तिक्तलोऽरुणास्तु सः॥

गन्धभादुले।

प्रसारणी च गन्धाली भद्रकाली कटुम्भरा॥

हंसपदी।

मधुस्रवा हंसपादी त्रिपदी हंसपद्यपि॥

नाटा।

पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः।

शवरस्थाग्निशिखः कुसुम्भः शरटस्तथा॥

गजपिप्पली।

पार्व्वतेयश्च करभोवशिरः करिपिप्पली।

जामाता च क्वचिच्चासौ सूर्य्यावर्त्तः सितोऽपरः॥

त्रिंशत्पर्य्यायकैरेभिश्छिन्नशाकगणोऽभवत्।

इतिपर्य्यायमुक्तावल्यां पाठादितिक्तशाकवर्गोदशमः।

जातीचम्पकसेवतीमुनियवामल्लर्कवासन्तिक-
सूचीधातुकयूकनोपस्तुवह्लाकूरीकहेमोद्रकैः ।
बन्धूकार्ज्जुनपाटलीविषहरव्यामास्वह्लास्फोतकैः
कुन्दाऽशोकपुरुषयूतिबकुलैर्व्याख्यायि पुष्पोगणः ॥

जातीपुष्प ।

सुमना मालती जाती तङ्गेदा मोददायीनी ॥

चापा ।

वरलब्धस्तु चाम्पेयश्चम्पकोहेमपुष्पकः ॥

सेवती ।

कुमारिका ग्रीष्मभवा सुगन्धा वनमल्लिका ॥

अगस्ति ।

अगस्तिः पूतिशाकश्च कुम्भजोमुनिपादपः ॥

जवा ।

ओड्रपुष्पं जवा रक्ते पारिजातः सितेऽपि च ॥

शतदलमल्लिका ।

भूपदी शतपत्रा तु मोहनी श्रेष्ठमल्लिका ॥

त्रिपुरमल्लिका ।

मदयन्ती गन्धवती मोदयन्ती खरस्वरा ॥

काष्ठमल्लिका ।

शीतभीरुर्भद्रमल्ली सैवास्फोता वनोद्भवा ॥

अरुणार्क ।

वसुकोर्कः सदापुष्पी तूपिका च विकारुणा ॥

शुक्लार्क ।

श्वेतार्को लर्कराजार्कौ मन्दारोगणरूपकः ॥

माधवी ।

अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलता ॥

केया ।

सूचीपुष्पोहलीनश्च जम्बुकः केतकीति च ।
केतकः काष्ठपुष्पः स्याद्दार्घुकः पाण्डुरच्छदः ॥

धातकीपुष्प ।

अग्निज्वाला सुभिक्षा तु धातकी धातुपुष्पिका ।
धावनी ताम्रपुष्पी च कुञ्जरा मद्यवासिनी ॥

वकपुष्प ।

वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः पाशुपतकोयूकश्च वसुहट्टकः ॥

कदम्ब ।

Indira Gandhi National
Centre for the Arts

कदम्बः प्रावृषेण्यः स्यान्नीपस्तु हलप्रियः ।

केलिकदम्ब ।

महाकदम्बः प्रियकोनीपश्च शिवधूर्त्तकौ ॥

शिउलीपुष्प ।

भूतकेश्या रक्तवृन्ता शेफालि सुवहा च सा ॥

छातिम ।

कुम्भीकः सुरपुन्नागश्छुविको ऽचिरपल्लवः ।
शारदः सप्तपर्णो ऽसौ हृतः कुग्रहनाशनः ॥

रक्तकाञ्चन ।

रक्तपुष्पः कोविदारोयुगपत्रस्तु काञ्चनः ॥

श्वेतकाञ्चन।

कवुदारः काञ्चनालः पाकारिः श्वेतकाञ्चनः॥

वाला।

वालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च॥

बान्धुली।

बन्धुकोबन्धुजीवः स्याद्ध्मानोरक्तकस्तथा॥

कृष्णतुलसी।

कृष्णार्ज्जकः कृष्णवल्ली कालमालः करालकः॥

गन्धतुलसी।

सुगन्धकोमञ्जरीकस्तीक्ष्णगन्धः फणिज्झकः॥

श्वेततुलसी।

अर्ज्जकः श्वेतपर्णासः श्वेतपत्रः कुठेरकः॥

Centre for the Arts

पारुली।

पाटला-लिप्रिया मोघा काचस्थाली फलेरुहा।

कामदूती कुबेराक्षी कुम्भी तोयाधिवासिनी॥

शिरीष।

मृदुपुष्पः शुकतरुः शिरीषोविषनाशनः॥

लताशिरीष।

कटभी कणही श्वेता महाश्वेता च लोमनी॥

दणा।

अतिलोहितगन्धश्च कामोदनमकस्तथा॥

करवीर।

कस्तुरीकः चेडकन्दः करवीरोऽश्वमारकः॥

अपराजिता।

आस्फोता गिरिकर्णिः स्यात् विष्णुक्रान्ता-पराजिता।
गवाक्षी श्वेतरी श्वेता नीलपुष्पा गवादनी॥

कुन्द।

माघंत्र कुन्दं निरामोदं करालकलिकं सितम्॥

अशोक।

वञ्जुलः किंकिरातः स्यादशोकः कर्णभूषणम्॥

पुन्नाग।

पुन्नागे पुरुषस्तुङ्गकेशरोदेववल्लभः॥

मुचुकुन्दः।

मुचुकुन्दकोदीर्घपुष्पोमुण्डीच्चाग्नुकारकः॥

करुणा।

छागलाद्यः करुणाकोमल्लिका पुष्पवल्लभा॥

नागेश्वरः।

नागपुष्पस्तथानागः केशरः कर्णभूषणः॥
चाम्पेयः केशरोनागः सुपर्णाक्षीर्द्विपादिकौ।
चामीकराह्वयोद्दीपः शक्रीत्यभिधीयते॥

जुइ।

गणिका यूतिका-म्बष्ठा वासन्ती च शिखण्डिनी॥

वकुल।

वकुलः केशरः करटस्तैलाङ्गोमधुपञ्जरः॥
षटत्रिंशत् पुष्पपर्य्यायै रासीत्पुष्पान्वयोगण।
इतिपर्य्यायमुक्तावल्यां लतादिपुष्पवर्ग एकादशः।

कुष्माण्डपिण्डीतकघोर्षटन्तकालिन्दयकैर्व्वारुकठिल्लकानि।
चिताङ्गवातिङ्गणतुम्बिचित्रापटोलज्योत्स्नासुषवीफलानि॥

कुमुडा।

कर्कारुकः स्यात् कुष्माण्डः कुष्माण्डः कुम्भपर्ण्यपि॥

पेयारा।

वराहः कृष्णपिण्डारुः कृष्णपिण्डीतकः फलम्॥

पेयाराभेदः।

पिण्डीतकः शुक्लपुष्पोब्रह्माण्डः पीतपुष्पकः॥

फुटी।

मुखवासः घोर्षटन्तस्त्रपुषी त्रपुषं तथा॥

तरमुज।

वैणाख्योवास्तु कालिन्दयोग्रीष्मर्खतम्रतानन्नम्॥

काकुड।

मदुकण्टफले-र्व्वारुः कर्कटो त्रपुषं तथा॥

गयाकरला।

चिर्भटं राजसुषवी चित्राङ्गा पूतिपल्लवा॥

काकडोल।

कर्कटोऽरण्यसंभूतः कठिल्लः सचमातनः॥

वार्त्ताकु।

वातिङ्गनस्तु वार्त्ताकी हिङ्गुली दुष्प्रधर्षिणी॥

लाउ।

तुम्बी पिण्डफला-लावूस्तुष्टा तुम्बी दृढतूफला॥

तितलाउ।

इक्ष्वाकुः कटुका-लावूरिति तुम्बी नृपात्मजा॥

राजगोमुक ।

चित्रा गवाक्षी गोदुग्धा गोडुम्बा नृपवल्लभा ॥

पल्‌ता ।

पटोलः कर्कशोराजकुलकस्तिक्तकःपटु ॥

झिङ्गा ।

कोषातकी दीर्घफला जालिकी क्षतवेधना ।

पीतपुष्पा क्षतछिद्रा ज्योत्स्नी कोशातकी तथा ॥

करेला ।

तोयवल्ली कटिल्लः स्यात् सुषवी कारवेल्लकः ॥

पर्य्यायैः पञ्चदशभिर्लताफलगणो मतः ।

इतिपर्य्यायमुक्तावल्यां कुष्माण्डादिलताफलवर्गो द्वादशः ।

Indira Gandhi National
Centre for the Arts

कशेरुशृङ्गाटसहाविदारीमानीतुम्बुराचीमुषलीरकोलैः ।

शालूककन्दाम्बुजकन्दकालशूरणार्द्रकैःकन्दगणःप्रदिष्टः ॥

केशुर ।

केशिकः स्यात् पीतरसो गौन्यः प्राच्यकशेरुकः ॥

पानीफल ।

जलवल्वी क्षुद्रकन्दः शृङ्गाटो जलकण्टकः ॥

घृतकुमारी ।

सहा कुमारी तरुणी कन्या स्थवकशालिनी ॥

भूमिकुष्माण्ड ।

क्षीरशुक्ला विदारीक्षु विदारी च पलाशिका ।

क्रोष्टी च भूमिकुष्माण्डोऽप्यवल्ली विदारिका ॥

चीरविदारि।

अन्या चीरविदारी स्यान्महाश्वेता-र्क्षगन्धिका॥

माण।

विषालपत्रः कण्डूरोमाणोविषविनाशनः॥

ओल।

शूरणोऽग्निशिखः कन्दस्तीव्रकन्दोऽर्शसूदनः॥

हरिद्रा।

हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।

हेमघ्नी रञ्जिनी पीता वर्णिनी रात्रिनामनी॥

तालमूली।

वक्रपत्री दृढा काण्डा ताली भूस्यामलक्यपि।

मुषली फलिनी सूक्ष्मा फला चश्रामलक्यपि॥

रसुन।

लशुनं रञ्जना-रिष्टमहाकन्द-रसोनकाः॥

पलाण्डु।

यवनेष्टः पलाण्डुः स्यात्तीक्ष्णगन्धश्च लोहितः॥

शालुक।

शालूकमुत्पलं कन्दं पुष्करं कन्दमूलकम्॥

रामकर्पूर।

गौरं सौगन्धिकं कन्दं कत्तृणं ध्यामरौहिषम्॥

पद्म।

कमलं पङ्कजं पद्ममब्जं नलिनमम्बुजम्।

कुशेशयश्च राजीवमरविन्दं सरोरुहम्॥

शुक्लपद्म।

शतपत्रं महापद्मं पुण्डरीकं सिताम्बुजम्॥

रक्तपद्म।

रक्तोत्पलं कोकनदं तद्वद्रक्तसरोरुहम्॥

नीलपद्म।

इन्दीवरं कुवलयं नीलाब्जं नीलमुत्पलम्॥

कुमुद।

कैरवं चन्द्रकान्तञ्च गर्द्दभं कुमुदं कुमुद॥

रक्तकुमुद।

तद्रल्पगन्धं सोमाख्यं सुरक्तं रक्तकैरवम्॥

जलकदली।

कदली जलकन्दा स्याद्रक्तपुष्पा मृगप्रिया॥

आलु।

आलुश्चतुर्व्विधोदण्ड-मधु-पिण्ड-फलाख्यया॥

खामआलु।

अम्लपलोदण्डालुगन्धालुः सोमवल्कलः॥

मउआलु।

मध्वालुः स्वादुकन्दश्च लोमशो गुप्तपत्रकः॥

हातिखोजाआलु।

पृथगालुश्च पिण्डालुर्हस्तिपात् पिच्छिलो गुरुः॥

फलआलु।

फलालुः स्यात् ग्रन्थिफलस्तथोभयफलस्तथा॥

पिण्डसारु।

स्याद्दल्ल-रनानालुः प्रक्षुवन्दोवक्रमजः॥

तेलभारु।

ह्रस्वकन्दोगुच्छकस्तुतनुत्वग्भिन्नवल्कलः॥

पानभारु।

एककन्दः फलानालुः कालकोठस्तडागजः॥

भूला।

कटुकन्दं नीलकण्ठं हरित्पर्णञ्च मूलकम्॥

श्रादा।

आर्द्रकं शृङ्गवेरं स्यात् पेयासान्ता वनोद्भवा॥

एभिस्त्रिंशत्सुपर्य्यायैः कन्दवर्गः प्रकीर्त्तितः।

इतिपर्य्यायमुक्तावल्यां कशेरुकादिकन्दवर्गस्त्रयोदशः।

---

न्यग्रोधारणिनिम्बहेमवरुणास्रोहारिभूर्ज्जाम्बुजाः।

वेणीशारदबीरफल्गुकुलिकाखल्ताजकर्ज्जार्ज्जुनाः॥

शाखोटारुणकर्णिकारकरजचीरोडुदोधर्म्मिणः।

पिङ्गोकिंशुकमोचीवीजकधवस्रचा महापादपाः॥

बट।

न्यग्रोधोवहुपात् शृङ्गी वटोवैश्रवनोदयः।

गणियारि।

तेजोमन्थो हरिमन्थो ज्योतिष्कः पावकारणिः।

वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका॥

निम्ब।

कैटर्य्यः पिचुमर्द्दश्च निम्बोऽरिष्टोहत्वचः।

छर्द्दनोहिङ्गुनिर्यासः प्रियसालस्तु पार्व्वतः॥

शोन्दालि।

आरेवतोराजवृक्षः प्रग्रहश्चतुरङ्गुलः।
आरग्वधोऽथ सम्पाकः कृतमालः सुवर्णकः॥

वरुणावृक्षः।

वरुणस्तिक्तशाकार्ह्वः श्वेतवृक्षोऽश्मसांपतिः॥

रोढा।

रोहीतकः प्लीहशत्रुर्व्विरतिक्तश्च रोहितः॥

भूर्ज्जवृक्षः

छद्रलपत्रः सितोभूर्ज्जोभूर्ज्जपत्रः स्थिरच्छदः॥

हिजल्।

आनूपोहिज्जलश्चैव निचुलोजलजस्तथा॥

देवताडक्।

वेणी जीमूतकश्चाखुविषघ्नि-क्लोमसच्छदः।
खरागरी देवदारी खुड्डकोदेवताडकः॥

छातिम्।

सप्तपर्णो विशालत्वक् शारदी विषमच्छदः॥

सिंशपावृक्ष।

पिङ्गला पिच्छिला धीरा कृष्णसारा च सिंशपा॥

काक्डुम्बर।

भद्रा च मलपूः फल्गुः काकोडुम्बरिका तथा॥

जज्ञडुम्बुर।

यज्ञाङ्गोविषवृक्षश्च हेमपुष्पोऽप्युडुम्बरः॥

वाट्ठकपाली।

हिंस्रा व्याघ्रनखी गुल्मी हाला काकादनीत्यपि।

अहिंसा कटुकापाली कापाली कुलिकोऽपरः ॥

अश्वत्थ ।

पिप्पलोबोधि-रश्वत्थ श्चैत्यवृक्षो गजाशनः ॥

गयाश्वत्थ ।

कुलिकच्छः कान्तनकोनन्दीवृक्षः कुबेरकः ॥

असन ।

अर्जकर्ज्जीवनेसर्ज्जौ महासर्ज्जोऽसनस्तु सः ॥

अर्ज्जुन ।

धन्वी धनञ्जयः पार्थौनदीजः ककुभोऽर्ज्जुनः ॥

आस्फोडा ।

आस्फोटकः पिशाचद्रुर्निर्यासीखरपल्लवः ॥

शोन ।

श्योनाकोभूतिपुष्पश्च पूतिवृक्षोमुनिद्रुमः ।

दीर्घवृन्तस्तु कट्वङ्गोभल्लूकस्तुण्टुकोऽरलुः ॥

उलट्कम्बल ।

द्रुमोत्पलः कर्णिकारः परिव्याधोऽङ्गनाप्रियः ॥

करञ्ज ।

चिरबिल्वोनक्तमालः करजश्च करञ्जके ॥

क्षीरकराड् ।

शीतद्रुः सरलश्चापि क्षीरवान् क्षीरमोटकः ॥

लताकराड् ।

पीलुपर्णी घनरसोहस्तिपर्णी च मोरटः ॥

जिञ्जापुता ।

पूतिपुष्पोऽङ्गारवृक्ष इङ्गुदी तापसप्रियः ॥

धामनवृक्ष।

धमन्यः पिच्छिलत्वक् च धन्ववृक्षश्च धर्म्मिणः ॥

शाञि।

कण्टकी रामकन्दश्च पिङ्गी सितशिरः शमी ॥

पलाश।

राजादनोब्रह्मवृक्षोहस्तिकर्णदलोऽपरः।

वातपीतः पलाशः स्याद्वानप्रस्थोऽथ किंशुकः ॥

भूपलाश।

आस्फोतकः सुगन्धश्च भूपलाशोविशल्यकृत् ॥

शिमुल।

तुलनी स्यात्तुलफली तथा मोची च शाल्मली ॥

पियासाल।

नीलभण्टः पीतसालोवीजकः प्रियकोषलः ॥

Centre for the Arts

धववृक्षः।

धवोधुरन्धरोवृक्षः शकटाख्यः सितोऽसितः ॥

पाकुड़ि।

प्लक्षः कमण्डलूवृक्षः कर्कटी लक्ष्मणोजटी।

महावृक्षास्त्वयस्त्रिंशत्पर्य्यायैः परिकीर्त्तिताः ॥

इति पर्य्यायमुक्तावल्यां न्यग्रोधादिमहावृक्षवर्गश्चतुर्दशः।

नन्दीवृक्षहलीनकेन्द्रसुरसद्राचायणीकाण्डिनी
चीरकाञ्चनहेमजीवकसुधाब्राह्मीसमङ्गाम्बरैः।
कम्बूकक्रकरद्विवृन्तरुवुकानन्तार्कपुष्पाचुकै
र्नाडीचर्म्मकषाजलोमहरितैःप्रोक्ताक्षुद्रहद्रुमाः ॥

गन्धमुण्ड गन्धभादुलिभेद ।

मन्दोष्टच स्याम्पाकी फलेपाकी कपीतनः ।
गर्द्दभाण्डोगन्धमुण्डोद्वितीयः चिप्रपाक्यपि ॥

शाकट्च ।

शाकट्चोहलीनश्च महापत्रोजनोत्तमः ॥

निसिन्दा ।

इन्द्राणीकेन्द्रसुरसोनिर्गुण्डी सिन्धुवारकः ॥

दन्ती ।

चित्रा दन्ती निकुम्भी स्यादुपचित्रा-णुरेवती ।
द्रवायणी विशल्या च तयोडुम्बरपर्ण्यपि ॥

हातिशुंडा ।

विशल्या पर्व्वपुष्पी च नागदन्ती विषौषधी ।
शुक्लपुष्पे-भदन्ताह्वा काण्डिनी कामदूतिका ॥

चीरकङ्कुकी ।

चीरोशोवरकन्दाख्या त्वक्छदः कुष्ठनाशनः ।
वल्योमूलकमूलाच खसकव्दस्तु कञ्चुकी ॥

जयपाल ।

सारकोजयपालश्च रेचकस्तिन्तिडीफलम् ।
दवाठावीजं चक्रदन्ती कुम्भः कनकसंज्ञकः ॥

धुतुरा ।

धुस्तूरकः शठोधूर्त्त उन्मत्तः कनकाह्वयः ॥

जियत्षष्ठी ।

कुमारी जीवसंज्ञोयं सुपुत्रोजीवकद्रुमः ॥

सिझ्॥

स्नुही समन्तदुग्धा स्नुक् वज्रद्रुः सुधा गुडः॥

वामुनहाटी।

पद्मा गर्द्दभशाखा च फञ्जिका-ङ्गारपर्ण्यपि।
भार्गी स्याद्ब्रयष्टिकाब्राह्मी ब्राह्मणी पद्मचारिणी॥

वराक्रान्ता।

नमस्कारी गण्डकारी समङ्गा खदिरीत्यपि॥

कापास।

तुण्डिकेरी समुद्रान्ता कार्पासी वदरा-म्बरा॥

वनकापास।

त्रिपर्णी वनकार्पासी भारद्वाजी वनोद्भवा॥

अश्वगन्धा।

हयगन्धा-श्वगन्धाख्योवाजिगन्धा-वरोहिका।
वल्या तुरङ्गगन्धा च कम्बुका-श्वावरोहका॥

करील।

उष्ट्रभक्ष्य करीरे तु क्रकर-ग्रन्थिलावुभौ॥

मेदी।

तिमीरकोद्दहन्तश्च द्विदन्तो नखरञ्जकः॥

एरण्ड।

आमण्डो ऽमण्डोमण्डः स्यादेरण्डो रुवुकोवुकः।
गन्धर्व्वहस्तकश्चित्रो वातारिस्तरुणोरुवुः॥

स्वर्णचीरी।

स्वर्णचीरी त्वनन्ता च हेमचीरी सरासहा।

हेमाद्रिजा हेमशिखा हेमपीतञ्च तत्पयः ॥

क्षीरहृच ।

पयस्या स्वर्पवल्ली च सितवर्णा-र्कपुष्पिका ॥

तिनिशवृक्ष ।

स्यन्दनस्तिनिशोनेमी चक्रकश्चातुको ऽच्छुकः ॥

हिङ्गुपत्री ।

हिङ्गुपर्णी वेणुपत्री नाडी हिङ्गुशिवाटिका ॥

चर्म्मकषा ।

सप्तलाख्या चर्म्मकषा चर्म्मसंज्ञा च सातला ॥

शूकशिम्बी ।

अजलोमा शिखी केशी महाह्रस्वा ऽग्र्यपर्ण्यपि ॥

भूतकेशी ।

अल्पकेशी तु गोलोमी भूतकेशी च केश्यपि ॥

काशीशम् ।

काशीशं धातुकाशीशं हरितं तच्चलोमसम् ॥

पुष्पकाशीशम् ।

द्वितीयं पुष्पकाशीशं सुशीतञ्च सितं तत् ॥

सप्तविंशतिपर्य्यायैः समाप्तो ह्रस्वपादपः ।

इतिपर्य्यायमुक्तावल्यां नन्दीवृक्षादिह्रस्ववृक्षवर्गः पञ्चदश।

दूर्व्वामुष्ककशल्लपोटगलकच्छत्रासहान्तर्गले

राष्टीजूर्णसुगन्धदेवकुसुमैः क्षुद्रेक्षुदण्डोत्पलैः ।

स्नीहघ्नीवमनोत्कटाम्बुतनुजाघण्टावरग्रावभित्

काशानिच मधूलिकुक्कुटिकुशैः प्रोक्तास्तु ह्रस्वद्रुमाः ॥

दुर्व्वा ।

सहस्रवीर्य्या दुर्व्वा तु मङ्गल्या भार्गवीरुहा ॥

श्वेतदुर्व्वा ।

शतपर्व्वा सितादुर्व्वा शतवीर्य्या सिता-परा ॥

घण्टापारुल् ।

घण्टाःपाटलिःचारङ्गुर्मुष्कक कालमुष्ककः ॥

शलवाहृच्च ।

गजाशना सपत्नी च शल्लकी सुरभिस्रवा ॥

खाग्डा ।

पोटगलो हृहत्कासः काण्डेक्षुः शरखड्गकः ॥

भूतृण ।

मूले पत्रे वचाकारस्थूलातिच्छत्रकौ समौ ॥

डानकुनी ।

गोवन्धना गन्धवल्ली सहदेवा सहा च सा ॥

ओक्डा ।

शुकला चाम्लपत्रा स्यादश्वाटोऽन्तर्गलोमतः ॥

माराटीवृच्च ।

महाराष्ट्री च राष्ट्री च रक्तारिः कटुपुष्पिका ॥

उलु ।

सूच्यग्रः स्थलकोदर्भोजूर्णाख्यश्च खरच्छदः ॥

नक्दना ।

कुलतृण्यां सुगन्धश्च तृणमूल्यं सुशीतलम् ॥

चोरङ्गली ।

अवाक्पुष्पी त्वधःपुष्पी मङ्गल्या-मरपुष्पिका ॥

गर्गड् ।

क्षुद्राक्षुरक्षो गोजिह्वा गुन्द्रा गुल्मगवेधुका ॥

शर ।

इक्षुःकाण्डः शरोवाणोमुञ्जस्तेजनगुन्द्रकौ ॥

दण्डोत्पला ।

दण्डोत्पला सितैः पुष्पैः विश्वदेवा-रुणैस्तु सा ॥

शरपुङ्खानील्यौ ।

प्लीहघ्नी शरपुङ्खा च नीली स्यान्नीलपत्रिका ॥

नल ।

नलस्तु धमनः पोटगलोदीर्घसमुच्छ्रयः ॥

इत्कड् ।

इत्कटोबद्धमूलश्च वाटी दीर्घखरच्छदः ॥

टोकापाना ।

कुम्भीकरोविपर्णी च इठः पानीयपृष्ठजा ॥

शोण ।

वृहत्पुष्पी शणोघण्टा वरा तु शणपुष्पिका ॥

महाशोण ।

महाशणोनाल्पपुष्पी वामनी कटुतिक्तका ।

पाथरकोड् ।

पाषाणभेदोग्रावारिः शिलाभेदोऽश्मभित्तथा ॥

काश ।

वायसेक्षु च काण्डेक्षुः काशश्चामरपुष्पिका ॥

आनाक्षु इक्षु विशेष ।

इक्षानिकेक्षु तुल्या स्या दनिक्षु खेक्षु रालिका ॥

मालकाकुडिया।

मधूलिर्घृतमण्डा च वायसानी सुमङ्गला॥

कालियाविषर।

उत्कटोवद्धलिङ्गा स्यात् सैवोक्ता कुक्कुटिः क्वचित्॥

कुश।

याज्ञीकोह्रस्वसृचश्च वर्हीर्दर्भः कुशः कुथः॥

ह्रस्वसृचगणः प्रोक्तः सप्तविंशतिकैर्द्रुमैः।

इतिपर्य्यायमुक्तावल्यां दुर्व्वादिह्रस्वसृचगर्गः षोड़शः।

---

ताम्बुलीऋषभीशुकास्युसुवहामौर्व्वी सुनन्दासहा

पालिन्दीकृगलाश्वकर्णऋषिजाकिम्पाकधामार्गवैः।

ब्रीडैन्द्रीविदृतोत्तमाशनिलताबेगीससर्पाचिभिः

संक्षेपात् परिकीर्त्तितः क्रमतयास्माभिर्लतानां गणः॥

पान्।

ताम्बूलवल्ली ताम्बुली नागवल्ल्योष्टरञ्जनी॥

आल्कुशी।

मर्कटी कण्डुरा-व्यण्डा सुगुप्ता कच्छुरा जडा।

शूकशिम्बा-त्मगुप्ता स्यादृषभी कपिकच्छुरा॥

शुयाठोटी।

शुकाख्या स्याच्छूकनासा सुशका च शुकानना॥

गोयालियालता।

गोधावल्ली तु सुवहा विदला हंसपद्यपि॥

तीतपुङ्गी।

मौर्व्वी नेत्रौषधी श्यामा वर्त्तिनीन्दीवरीति सा॥

दूर्व्वामूल।

अर्कपत्रा सुनन्दा स्यादर्कमूला विषापहा॥

माषानी।

सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
कृष्णवृन्ता च काम्भोजी पाण्डुलोमशपर्ण्यपि॥

मुगानी।

मुद्गपर्णी च दूरसहा कामुद्गा क्षिप्रपर्णिका।
अन्या मर्ज्जारगन्धेति सूर्पपर्णावुभे च ते॥

श्यामालता।

कालमेषी महाश्यामा सुभद्रो-त्पलशारिवा।
दीर्घमूली च पालिन्द्री मसूरविदला च सा॥

अनन्तमूल।

गोपवल्ली कराला च सुगन्धा भद्रवल्लिका।
गोपीभद्रा च सानन्ता नागजिह्वा च शारिवा॥

श्वेतवक्का लताविशेष।

श्वेतवक्का-ऽपीडातु यवतिक्ता विसर्पिणी।
शङ्खिनी स्यात् क्वचिच्चान्या गिरिजा धूषरच्छदा॥

नीलवक्का।

निलिनी चुगलान्धी स्याद्दलः कोटरपुष्पिका।
अजान्धी नीलवन्धा स्यान्नीलपुष्पा-तिलोमशा॥

सियाड़िलता।

तार्चो ऽश्वकर्ण ऋषिकोवल्योदीर्घलताद्रुमः॥

सर्पगन्धा।

रुच्यगन्धा सर्पगन्धा ऋषिजा-ऽनिकसथा॥

माकाल।

उरुकालोमहाकालः किम्पाकः काकमर्द्दकः॥

पीतघोषा।

धामार्गवः पीतघोषा राजकोषातकी तथा।।
कर्क्कोटकी महाजाली च्वेडः कोषफला च सा॥

वनकुलत्थ।

व्रीड़ा कुलाली चक्षुष्या कुम्भकारी कुलत्थिका॥

वदरीभेद।

हस्तिकोलि र्गोपघोण्टा घोण्टा सा वदवीच्छदा॥

राखालशशा।

ऐन्द्री-न्द्रवारुणी चित्रा गवाची गलटिर्भटा।
मृगेर्व्वारुः पिटङ्कोटि विशाला च मृगादनी॥

तेउडी।

त्रिवर्गकाची सुवहा त्रिभण्डी त्रिपुटी तथा।
व्याघ्रादनी कुटुरणा निश्रुता त्रिवृता-रुणा॥

चुद्रचिराइ।

उत्तमा दुग्धिका युग्मचलोत्तमचवन्यसौ॥

हाड़भाङ्गा।

वज्रव्यल्य-स्त्रिसंहारोग्रन्थिमान् कुलिशोऽमरः॥

विडङ्क।

सुगान्धिगन्धा छगला-न्त्रावेगी द्धद्दारकः॥

सर्पकङ्कालि।

सर्पकङ्कालिका तीक्ष्णा विषदंष्ट्रा विषापहा॥

पानीयसिउली।

सर्पसहा सर्पनामा सर्पाक्षी सर्पघातिनी॥

पञ्चविंशतिवीरुद्भिर्लतावर्गः प्रकीर्त्तितः।

इति पर्य्यायमुक्तावल्यां ताम्बूलादिलताद्दष्ववर्गः सप्तदशः।

हरेणुनिष्पावमसूरमुद्गतिलाढकीमाषकराजमाषैः।

कुलत्थकौशिम्बिचशिम्बिधान्यं शूकन्तुगोधूमयवाश्मसहादि॥

यड़चना।

हरेणु मुण्डचणकोव्रीहिः कृष्णादिकाश्मरी॥

छोला।

चणकोहरिमन्थश्च कञ्चुकी कृष्णचूरकः॥

कृष्णछोला।

लङ्का रसाली त्रिपुटा कलाया रुचणालिका॥

सिम्।

निष्पावस्तृणशिम्बी स्यान्माध्वीकश्च पलङ्कषः॥

मुकुट्सिम्।

अन्यस्तु मधुनिष्पावोनन्दनोहैमनस्तथा॥

सिम्भेद।

तद्भेदाः श्यामला रक्ता राजिकालोहितागिताः।

सुकुमारा दीर्घबीजा दीर्घशिम्बा मधुच्चरा॥

मसूर।

मङ्गल्यकोमसूरश्च शम्भ्राङ्कः पृथुवीजकः॥

मुग्।

शारदस्तु हरिन्माङ्गोवर्णाहेधुरणीफलः॥

कृष्णमुग्।

कृष्णमुद्गस्तु वासन्तो माधवश्च सुराष्ट्रजः ॥

वनमुग्।

अम्बष्ठश्च मुकुष्ठश्च वनमुद्गः क्रमीनकः ॥

तिल्।

स्नेहगर्भस्तिलः पैत्रः पवित्रोहेमधान्यकम् ॥

तिलपिडाइ।

तिलपिण्डी तिलमलः पिण्याकस्तिलकल्कजः ॥

टोकोर्।

कृष्णला तुवरी वर्ध्या करवीरो भुजाढकी ॥

मसिना।

मदगन्धा हैमवती सुनीला पिच्छिला-तसी ॥

माषकलाइ।

माषस्तु कुरुविन्दः स्याद्धान्यवीरोऽथ पाकरः ॥

वरवटी।

राजमाषो रसेन्द्रः स्यान्नीलमाषोऽथ पोचितः ॥

कुलत्थ।

स्याद्यावकस्तु कुल्माषस्ताम्रबीजः कुलत्थकः ॥

रम्भा।

महाशिम्बी तु कोषाम्बी मधुरा च मृगादनी।

गम्।

गोधूमोऽजमलोऽपुष्पो निस्तुषः सुमनोऽथ पः ॥

लघुगोधूम।

बहुदुग्धो भवेदल्पगोधूम म्लेच्छभोजनम् ॥

यव।

सितशूकोयवोमेध्यस्तीक्ष्णशूकश्चकञ्चुरिः।
वञ्चप्रियोऽतिशूकश्च तोक्मश्च हरितोयवः॥

जनार्।

शौल्यशीतोद्दक्षधान्यः वेत्रेचुश्चाश्मरीरिपुः॥

कालजनार्।

तुवरोयौवनः कृष्णोयवनालश्च यावकिः॥

इति शूकधान्यं।

त्रयोविंशतिभिः शिम्बीशूकधान्यगणोमतः॥

इति पर्य्यायमुक्तावल्यां हरेन्वादिशिम्बधान्यशूकधान्य-
वर्गोऽष्टादशः॥

Indira Gandhi National

श्यामाकनीवारककङ्गुचीनवंशोत्थनन्दीमुखकोद्रवादि।
तृणाख्यधान्यं नृपभोज्यषष्टिकक्षोग्रगन्धापि च शालिधान्यं॥

शामाधान्य।

श्यामाकस्तृणवीजः स्यात् तृणसुद्रोहरिप्रियः॥

उडीधान्य।

ओडी नीवार उदितोमुनिष्टं वन्यधान्यकम्॥

काङ्गनिधान्य।

स्थूलकङ्गुश्च कुङ्गुश्च वरकश्च प्रियङ्गुकः॥

चिनाधान्य।

चीनोभाद्रविकः प्रोक्तः कालाङ्गोलघुपाक्यऽपि॥

वंशधान्य।

वेणुजोवंशधान्यं स्याद्वैणवोवंशतण्डुलः।

तद्भेदा।

नन्दीमुखोवङ्कफलोमाकलं कलिकस्तथा।

मधूनिहरिताद्याश्च देशभेदात् पृथग्विधाः॥

कद्रो।

कोद्रवः कोरदूषश्च कुद्दालोमदनाग्रकः॥

क्षुद्रकद्रो।

तद्भेदः कोद्रवोऽन्यः स्याद्वकुलोवनकोद्रवः॥

इति तृणधान्यं।

शालिधान्य।

धान्यं शालिर्भोजनार्हं भोगश्च शिवसाधनम्॥

राजशालि।

धान्यश्रेष्टं राजधान्यं नृपार्हं राजशुकजम्॥

षाटियाधान्य।

षष्टिवासरजः शालिः षष्टिकः स्निग्धतण्डुलः॥

महाशालिधान्य।

स्थूलशालिर्महाशालिः शालिराट् स्थूलतण्डुलः।

वीरतरुवीरिरष्टचोष्टहङ्कान्योऽप्सरीप्रियः॥

गन्धधान्य।

गन्धशालिस्तु कुम्भासोगन्धालुः कलिकोत्तमः॥

शालिभेद।

रक्तालुर्मन्तुकलमः बीहिकृष्णादिका-श्मरिः॥

रक्तशालि।

रक्तशालिस्ताम्रशालिः शोणशालिश्च लोहितः॥

इतिशालिधान्यं।

एवं सूक्ष्मादिशालीनां नामान्युक्तानि सूरिभिः॥
धान्यानामुनविंशत्या तृणशालिगणोऽभवत्।

इति पर्य्यायमुक्तावल्यां श्यामाकादितृणधान्यवर्ग उनविंशति।

भक्तादिभिर्भक्तविकारजातैर्यूषैः समण्डैरपिसाधितान्नैः।
नानाविधव्यञ्जनकैरनेकैः पूर्पैर्निरुक्तश्च कृतानुवर्गः॥

अन्न।

भिष्मा-न्धोदीधितिर्भक्तमन्नमहारमोदनम्॥

उच्छिष्टान्न।

विघसोजगधिश्चाजग्धो येनाभक्तसमुज्झितम्॥

यवादिअन्न।

भोज्यं भोच्यं च लेह्यञ्च पेयमन्नं चतुर्व्विधम्।
निष्पेयं चर्व्वणं चोष्यं खाद्यं केऽप्याहुरष्टधा॥
यवायावनगोधुमभक्तानामपि तादृशम्॥

पेया।

दशपञ्चगुणे तोये सिद्धा पेया-ल्पशिक्थका॥

काञ्जि।

आरणालकसौवीरकुल्माषाभिसूतानि च।
अवन्तीसोमधान्याम्लकुञ्जलानि च काञ्जिकम्॥

विलेपी।

चतुर्गुणजले सिद्धा वेलेपी विरलद्रवा॥

जाउ।

यवा गुरुशिका श्राणा वङ्कला षड्गुणा-म्भषा॥

यवेरजाउ।

विन्नप्रियन्त सिद्धान्नं षट्कोयवयवाग्गुक्ता॥

खिरिसा।

तिलश्राणा तु क्षरा त्वानवः पिष्टपायसः॥

चीरी।

पायसः पयसा सिद्धा यवागुः चीरिका च सा॥

यूष।

वैदलान् वितसान् भृष्टान् चतुर्भागाम्बुसाधितान्।
निष्पीड्य तोयमेतेषां संस्कृतं यूष उच्यते॥

यूषभेद।

मौद्गकौलत्थगोधूमा यूषा मुद्गादिसम्भवाः॥

अन्नमण्ड।

मासराचामनी स्रावा मण्डे भक्तसमुद्भवे॥

मण्ड।

निर्भक्तः साधितोमण्डश्चतुर्दशगुणोदकैः॥

लाजमण्डादि।

मण्डः सर्व्वरसा श्रेणी लाजमण्डादिकैरऽपि च॥

खद्द॥

पूर्व्वाग्रेऽपि च लाजाः स्युर्नद्ध्योरच्चतं तथा॥

चिड़ा भृष्टयव।

पृथुकः स्याच्चिपिटकोधाना भृष्टयवे स्त्रियः॥

दधिमिश्रितसक्तु।

रसालामाज्जिताप्रोक्ता करम्भोदधिसक्तवः॥

छातु।

घरतण्डुललाजानां चूर्णं सक्तुः प्रकीर्त्तितः ॥

अक्षतमण्ड।

संतोदमण्डोमण्डश्च दुग्धादिपरिगोलितः ॥

साधितान्न।

यवादिसाधितान्नानां केवलानामलोदितम् ॥

मांसजाति।

जातिवदष्टविधं मांसं मृगविष्किरप्रतुदैः।

प्रसहविलेशयमहामृगजलचरमत्स्यैः क्रमात्कथितम् ॥

मृगजाति।

कुरङ्गशशगोकर्णसम्बरैणादिका मृगाः ॥

विष्किरजाति।

Indira Gandhi National

वर्त्तिकातित्तिरीकेकीकुक्कुटाद्यास्तु विष्किराः ॥

प्रतुदजाति।

लञ्चकोकिलदात्यूहशुक्याद्याः प्रतुदाः स्मृताः ॥

प्रसहजाति।

सिंहचौद्राखुकरटोलूकाद्याः प्रसहाः स्मृताः ॥

विलेशयजाति।

गोधानकुलभेकाहिश्वाविधाद्या विलेशयाः ॥

महामृगजाति।

खड्गोभचोलगवयमहिषाद्या महामृगाः ॥

जलचरजाति।

हंससारसकादम्बवकक्रौञ्चादयोऽप्चराः ॥

मत्स्यजाति।

मत्स्या रोहितकुम्भीरकूर्म्मशम्बूककर्कटाः॥

मृग।

एतद्वर्गोक्तजन्तूनां प्रसिद्ध्या नाम कथ्यते।
मृगोकुरङ्गवातायुहरिणाजिनयोनयः॥

मयूर।

मयूरोवर्हिणोवर्हीनीलकण्ठोभुजङ्गभुक्।
शिखावलः शिखी केकी मेघनादानुलास्यपि॥

मयूरचन्द्र।

केका वाणी मयूरस्य समौ चन्द्रकमेचकौ॥

मयूरपुच्छ।

शिखा चूड़ा शिखण्डस्तु पिच्छवर्हे नपुंसके॥

Indira Gandhi National ... Arts

कुकुड़ा।

कृकवाकुस्ताम्रचूड़ः कुक्कुटश्चरणायुधः॥

कोकिल।

वनप्रियः परभृतः कोकिलः पिक इत्यपि॥

शुकपक्षि।

कलकण्ठश्च दात्यूहस्तथा कीरः शुकोऽपि च॥

वानर।

शाखामृगः प्लवङ्गश्च मर्कटोवानरः कपिः॥

कुक्कुर।

श्वनकः सारमेयश्च मृगदंशश्च कुक्कुरः॥

शृगाल।

गोमायुः क्रोष्टुकः क्रोष्टा शृगालोजम्बुकः शिवा॥

भ्रमर।

मधुपोभ्रमरोभृङ्गोद्विरेफोऽलिस्तु षट्पदः॥

सिंह।

सिंहोमृगेन्द्रः पञ्चास्योहर्य्यक्षः केशरी हरिः॥

भालुक।

भालुकेऽच्छभल्लः स्यादृक्षोभल्लुक एव च॥

विडाल।

ओतुर्विडालोमार्ज्जारोवृषदंशक आखुभुक्॥

इन्दुर। छुछुन्दुर।

उन्दुरुर्मूषिकाप्याखुर्गिरिका बालमूषिका॥

काक।

ध्वाङ्क्षास्तु करटः काकोवलिभुग् वायसोऽपि॥

पेचक।

उलूकः कौशिकः पेचा काकभीरुर्निशाचरः॥

गोधापक्षि।

त्रयोगोधेरगौधारगौधेया गोधिकात्मजे॥

भेक।

भेके मण्डूकवर्षाभूः शालूरः प्लवदर्दुराः॥

सर्प।

सर्पोऽहिर्भुजगश्चक्री दाडस्तु विषभुक् फणी॥

शजारु।

श्वावित्तु शल्यस्तल्लोम्नि शलनी शललं शलम्॥

गण्डार।

खड्गस्तु गण्डकः खड्गी पूतास्थिः पितृवल्लभः॥

हस्ती।

हस्तीभोद्विरदोदन्ती द्विपः स्तम्बेरमोगजः॥

वराह।

वराहः शूकरोघोणी घृष्टिर्दंष्ट्री भूदारकः॥

महिष।

लुलापोमहिषोवाहद्विषत्कासरसैरिभाः॥

घोटक।

तुरगोवाहयोवाजी घोटा-श्वस्तु तुरङ्गमः॥

उष्ट्र।

उष्ट्रोमहाङ्गश्च मयोमहापृष्ठः क्रमेलकः॥

मेष।

मेढोरभ्रोरणोर्णायुमेषवृष्णाय एडकाः॥

गाधा।

वालेयकस्तु चक्रीवान्रासभो गर्द्दभः खरः॥

वृष।

अनड्वान् सौरभेयोगौ ऋषभोवृषभोवृषः॥

हंस।

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः॥

राजहंस।

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः॥

वालिहास्।

सारसः पुष्पकाह्वः स्यात् कादम्बः कलहंसकः॥

वक्।

कस्तुकीर्त्तितः लङ्क कङ्कुः क्रौञ्चककञ्चुकी॥

पक्षि ।

शकुनोऽपि खगः पक्षी-विहङ्गोविहगोऽण्डजः ॥

गृहचटक ।

कुलिङ्गोकलविङ्कश्च चटकोवेश्मचापलः ॥

मत्स्य ॥

मीणो वैसारिणोमत्स्यः पृथुरोमा झषोऽण्डजः ॥

रोहितमत्स्य । कुम्भीर ।

रोहितोमत्स्यराजश्च । कुम्भीरोनक्र उच्यते ॥

कच्छप । सामुक ।

कमठः कच्छपः कूर्म्मः । शम्बुका जलशुक्तयः ॥

काकड़ा । जलजन्तु ।

स्यात् कुलीरः कर्कटकः । यदांसि जलजन्तवः ॥

इति मांसप्रक्रिया ।

व्यञ्जन ।

स्यात्तेमनन्तु निष्ठानं सूपः स्याद्व्यञ्जनं सुदः ॥

संस्कारव्यञ्जन ।

प्रणीतमुपसम्पन्नं प्रयस्तं स्यात् सुसंस्कृतम् ॥

लवणकैशादिशोधितव्यञ्जन ।

स्यात् पिच्छिलन्तु विजिनं संसृष्टं शोधितं समे ॥

आमिषव्यञ्जन ।

मत्स्यमांसफलैर्युक्तं नानानाम प्रगृह्यते ॥

पाकावस्थागतकलायादि ।

आपक्वं पौलिरभ्यूषोष्टतैलविपाचित ॥

पिष्टक।

जलाग्निना तु सुस्विन्नः पूपोऽपूपस्तु पिष्टकः॥

नानापिष्टक।

पनसादिफलैर्युक्तः साधितोऽपि तथाविधः॥

कृतान्नवर्गः कथितोद्रव्यैरेभिर्द्व्यशीतिभिः।

इति पर्य्यायमुक्तावल्यां भक्तादिकृतान्नवर्गोविंशतिः॥

—०००—

दिव्याम्भोविनदीतड़ागसरसीचूण्डावभिद्वापिका

कूपास्त्वारजतवोताम्बुदभ्रधाशीतोष्णोहंसोदकेः।

हैमोषः परिवासितर्भजमितिप्रोक्तानिपेयोगणैः

चोरादिनिदधीनितक्रगवनोधाभ्रानिसर्व्वानि च॥

स्वर्ग।

स्वर्णाकस्त्रिदिवःस्वर्गो द्योदिवत्रिदशालयाः॥

समुद्र।

रत्नाकरः समुद्रोऽब्धिरुदन्वान् सागरोऽर्णवः॥

नदी।

नदी सरित् सैवलिनी तटिनी निम्नगा-पगा॥

स्वर्गगङ्गा।

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका॥

गङ्गा।

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा।

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि॥

यमुना।

कालिन्दी सूर्य्यतनया यमुना शमनस्वसा॥

नर्म्मदा।

रेवा तु नर्म्मदा सोमोद्भवा मेखलकन्यका॥

नदीभेद।

गोदावरी चन्द्रभागा सरयूश्च सरस्वती॥
भीमा पयोष्णी कावेरी शिप्रा सिन्धुश्च गोमती॥

ह्रद।

पद्माकरस्तड़ागः स्यादकृत्रिमसरिद्धृह्रदः॥

पुष्करिणी।

पुष्करिण्यान्तु खातं स्यात् कासारः सरसी सरः॥

बुद्बुद।

चूर्णः सैकतकूपः स्यादुद्भिदो बुद्बुदोत्थितः॥

दिघी।

वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका॥

कुया।

अन्धुः कूपः प्रहीनं स्यादुपलम्भन्तु पुंसि वा॥

पर्व्वत।

शैलाद्रिपर्व्वतक्ष्माभृच्छैलोग्रावाचलोगिरिः॥

पाषाण।

पाषाणः प्रस्तरग्रावोपलाश्मानः शिला दृषत्॥

पर्व्वतशृङ्ग।

स्नु प्रस्थः शिखरं शृङ्गं कूटं सानुरधित्यका॥

पर्व्वतकन्दर।

दरी तु कन्दरो वा तु देवखातविले गुहा॥

पर्व्वतनिर्झर।

उत्सः प्रस्रवणं वारिप्रवाहे निर्झरोझरः ॥

हिम।

तुषारं शीतलं शीतं सुषीमं शिशिरं हिमम् ॥

उष्ण।

तीगमं तीक्ष्णं खरं तप्तमप्युष्णं सोष्णवैकृतम् ॥

अल्पोष्ण।

कोष्णं कवोष्णं मन्दोष्णमनाशुष्णं कदुष्णकम् ॥

अष्टप्रहर।

दिवानिशोषितं हंसोदकमप्याष्टयामिकम् ॥

वासिजल।

उषितं स्यात् पर्य्युषितं प्रस्तनं व्युषितं तथा ॥

हिम्। आकाशवाष्प।

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥

सुगन्धिजल।

उषः पीतमुषस्तोऽयं सुगन्धिः परिदर्शितम् ॥

षड्ऋतु।

हेमन्तः शिशिरः पौष्पोग्रीष्मोवर्षा शरद्दतुः ॥

जलभेद।

कियन्त्युक्तानि नामानि जलं हृद्योपदेशतः ॥

दुग्ध।

क्षीरं पीयूषमौषधद्रवं दुग्धं क्षीरं पयोतऽमृतम्।

सरपांपड़ी।

दुग्धसारं सरक्षीरं सन्तानं रसपर्पटी ॥

वसादधि।

नप्संदधि पयस्यञ्च दाधिकं दधिसंस्कृतम्॥

घोल।

किलाटं दधि दुग्धञ्च तक्रं पादजलान्वितम्॥
तक्री गोरसजं घोलं कालसयं विलोडितम्॥

नवनी।

दण्डाहतञ्च सरजमुदश्विन्मथितं द्रवम्।
दधिजं नवनीतं स्यात् सारं हैयङ्गवीनवम्॥

घृत।

घृतमाज्यं हविः सर्पिः पवित्रं नवनीतजम्॥

Indira Gandhi National

पेयावर्गोभवेत्पञ्च विंशद्द्रव्याभिधायकैः।
इति पथ्यापथ्यमुक्तावल्यां पानीवर्गस्यैकविंशतिः॥
समाप्तश्चायं ग्रन्थः।

IGNCA RAR
ACC No. 5-318

Indira Gandhi National
Centre for the Arts